# ॥ निर्वाणषट्कम् ॥

## Six Verses about Nirvāṇa

मनोबुद्ध्यहङ्कारचित्तानि नाहं
न च श्रोत्रजिह्वे न च घ्राणनेत्रे।
न च व्योमभूमी न तेजो न वायुः
चिदानन्दरूपः शिवोऽहं शिवोऽहम्। १॥

1. I am not the mind or its divisions of the perceiving faculty, the intellect, and the ego. I am not the ear, tongue, nose, or eye (with the skin — the jñānendriya-s). I am not space, earth, fire, or wind (with water — the mahābhūta-s). I am Śiva, I am Śiva, Whose form is the bliss of consciousness.

न च प्राणसंज्ञो न वै पञ्चवायुः
न वा सप्तधातुर्न वा पञ्चकोशाः।
न वाक्पाणिपादं न चोपस्थपायू
चिदानन्दरूपः शिवोऽहं शिवोऽहम्। २॥

2. I am not what is known as prāṇa or the five winds. I am not the seven constituents or the five sheaths of the body. I am not speech, hand, foot, or organs of reproduction and elimination (the karmendriya-s). I am Śiva, I am Śiva, Whose form is the bliss of consciousness.

न मे द्वेषरागौ न मे लोभमोहौ
मदो नैव मे नैव मात्सर्यभावः।
न धर्मो न चार्थो न कामो न मोक्षः
चिदानन्दरूपः शिवोऽहं शिवोऽहम्। ३॥

3. I have no aversion or attachment. I have no greed or delusion. I have no pride or emotion of jealousy. I have no duty, wealth, desire, or liberation (the puru.saartha-s). I am Śiva, I am Śiva, Whose form is the bliss of consciousness.

॥ निर्वाणषट्कम् ॥

न पुण्यं न पापं न सौख्यं न दुःखं
न मन्त्रो न तीर्थं न वेदा न यज्ञाः ।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानन्दरूपः शिवोऽहं शिवोऽहम् । ४ ॥

4. I have no virtue or sin, or happiness or sorrow, or mantra or pilgrimage, or Veda-s or sacrifices. I am not enjoying or enjoyed or enjoyer. I am Śiva, I am Śiva, Whose form is the bliss of consciousness.

न मृत्युर्न शङ्का न मे जातिभेदः
पिता नैव मे नैव माता न जन्म ।
न बन्धुर्न मित्रं गुरुर्नैव शिष्यः
चिदानन्दरूपः शिवोऽहं शिवोऽहम् । ५ ॥

5. I have no death or fear or distinction of class. I have no father or mother or birth. I have no relative or friend, or teacher or student. I am Śiva, I am Śiva, Whose form is the bliss of consciousness.

अहं निर्विकल्पो निराकाररूपः
विभुत्वाच्च सर्वत्र सर्वेन्द्रियाणाम् ।
न चासङ्गतं नैव मुक्तिर्न बन्धः
चिदानन्दरूपः शिवोऽहं शिवोऽहम् । ६ ॥

6. I am changeless and formless. I am everywhere for all senses due to being omnipresent. I am not ununited. I have no liberation or bondage. I am Śiva, I am Śiva, Whose form is the bliss of consciousness.

इति निर्वाणषट्कं संपूर्णम्